# झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद, राँची

## 2023-24

### आदर्श-प्रश्नपत्र(मॉडल प्रश्न-पत्र )

**विषय - संस्कृत** **Time:-03:00 Hr**

कक्षा - दशमी FM-80

---

सामान्यनिर्देशः-

- अभ्यर्थिनः यथाशक्ति स्वशब्देषु उत्तरं दद्युः।
- कुलप्रश्नानां संख्या 52 अस्ति।
- प्रश्नः 1 तः 30 पर्यन्तं बहुविकल्पप्रश्नाः सन्ति, प्रत्येकं प्रश्ने चत्वारः विकल्पाः सन्ति।
- सम्यक् विकल्पं चिनोतु। प्रत्येकं प्रश्नस्य कृते एकं अंकं विनियोजितं भवति।
- प्रश्नसङ्ख्या 31 तः 38 पर्यन्तं अतीव लघु उत्तरप्रश्नाः सन्ति। येषु कस्यापि 6 प्रश्नस्य उत्तरं दातुं अनिवार्यम् अस्ति। प्रत्येकस्य प्रश्नस्य मूल्यं 2 अङ्केषु निर्धारितं भवति।
- प्रश्नसङ्ख्या 39 तः 46 पर्यन्तं लघुउत्तरप्रश्नाः सन्ति। येषु कस्यापि 6 प्रश्नस्य उत्तरं दातुं अनिवार्यम् अस्ति। प्रत्येकस्य प्रश्नस्य मूल्यं 3 अङ्केषु निर्धारितं भवति।
- प्रश्नसङ्ख्या 47 तः 52 पर्यन्तं दीर्घ उत्तरप्रश्नाः सन्ति। कस्यापि 4 प्रश्नस्य उत्तरं दातुं अनिवार्यम् अस्ति। प्रत्येकस्य प्रश्नस्य मूल्यं 5 अङ्केषु निर्धारितं भवति।

---

**निर्देशः- अधोलिखित-वाक्येषु रेखांकितपदस्य संधि-पदं विच्छेद-पदं वा चिनुत-**

1. **तथा+अपि** वृषः न उत्थितः।

(क) तथोअपि (ख) तथापि (ग) तथौपि (घ) तथेपि

2. **चलत्+अनिशम्** कालायसचक्रम् ।

(क) चलदनिशम् (ख) चलतानिशम् (ग)चलतेनिशम् (घ) चलतीअनिसम्

3. **पो+अनम्** अत्र वहति।

(क) पौनम् (ख)पावनम् (ग) पोअनम् (घ) पवनम्

4. अधुना **वर्षर्तुः** अस्ति।



Jharworld.com

(क) वर्षा+ऋतुः (ख) वर्ष +ऋतुः (ग) वर्षो+ऋतो (घ) वर्षौ+ऋतुः

**निर्देशः- रेखांकितपदानां प्रकृति- प्रत्ययौ संयोज्य विभज्य वा विकल्पेभ्यः चिनुत-**

5. **<u>(जनताः</u>)** सर्वे जानन्ति।

(क) जन+अनीयर् (ख) जन+ तल् (ग) जन+ त्व (घ)जन+शतृ

6. बुद्धिः **<u>(बल+ मतुप)</u>** तन्वि सर्वकार्येषु सर्वदा ।

(क) बलवती (ख) बलवत् (ग) बलमान् (ध) बलुमान्

7. **<u>(बल+इनि)</u>** बलं वेत्ति।

(क) बली (ख) बलिना (ग) बलिनौ (घ) बलिने

8. छात्राः **<u>(वद्+शतृ)</u>** --------पठन्ति ।

(क) वदन् (ख) वदन्तः (ग) वदन्ताः (घ) वदन्तौ

**निर्देशः - रेखांकित-पदेषु/स्थूल-पदेषु समस्त-पदं विग्रहपदं वा कुरुत -**

9. तदेवाहुः **<u>महान् आत्मा येषां, ते</u>** समत्वमिति।

(क) महात्मनाम् (ख) महात्मानः (ग) महात्मानं (घ) महात्मा

10. तस्य गृहम् **<u>उपगङ्गम्</u>** अस्ति।

(क) गङ्गाम् उप (ख) गङ्गायाः समीपं (ग) गङ्गायै समीपं (घ) गङ्गायाः दूरम्

11**<u>. धूर्तः शृगालः</u>** हसन् आह।

(क) धूर्त-शृगालः (ख) धूर्तेनशृगालः (ग) धूर्त - शृगालान् (घ) धूर्त - शृगालाय

12**<u>. रामः च लक्ष्मणः च</u>** आदर्श - भ्रातरौ।

(क) रामलक्ष्मणाः (ख) रामलक्ष्मणौ (ग) रामलक्ष्मणाभ्याम् (घ) रामलक्ष्मणेभ्यः

**निर्देशः - वाच्य-परिवर्तनम् उचित - पदैः पूरयत -**

13. लता चन्द्रं - - - - - - - - - ।

(क) पश्यति (ख) दृश्यते (ग)दृश्यन्ते (घ) पश्यते

14. मया------------पठ्यते।

(क) पुस्तकेन (ख) पुस्तकम् (ग)पुस्तकानि (घ) पुस्तके

15. बालकः उच्चैः----------।



नवोन्मेष शोध नेतृत्व JCERT
Jharworld.com

(क) हसति (ख) हस्यन्ते (ग)हसन्ति (घ) हस्यते

16.---------आम्रं खादामि।

(क) अहम् (ख) माम् (ग) मया (घ) अस्माभिः

17. देवेन कार्याणि ---------।

(क) करोति (ख) क्रियते (ग) क्रियन्ते (घ) करोषि

**निर्देशः - रेखांकित-पदं /स्थूलं पदम् अशुद्धम् अस्ति तत् पदं शुद्धं कुरुत-**

18. अहम् आम्रं **खादति**

(क) खादामः (ख) खादामि (ग) खादावः (घ) खादन्ति

19. **जनाः** कार्यम् करोति।

(क) जनः (ख) जने (ग) जनात् (घ) जनम्

20. लता **शोभनः** बालिका अस्ति ।

(क) शोभनम् (ख) शोभनेन (ग) शोभना (घ) शोभनान्

21. रामः **सीतेन** पश्यति।

(क) सीताम् (ख) सीतया (ग) सीता (घ) सीतायाः

**निर्देशः - समुचितं कालबोधक- संस्कृत - शब्दं लिखत -**

22. देवेशः प्रातः (5:15)------------ उत्तिष्ठति।

(क) पञ्च - वादने (ख) सपाद-पञ्च-वादने (ग) सार्ध- पञ्च- वादने (घ) पादोन-पञ्च-वादने

23. पुनः प्रातः (6:30)--------------- भ्रमति।

(क) षड् - वादने (ख) सपाद-षड्-वादने (ग) सार्ध-षड्- वादने (घ) पादोन-षड्-वादने

24. प्रातः (7:45)------------- कार्यं करोति।

(क) अष्ट - वादने (ख) सपाद-सप्त-वादने (ग) सार्ध- सप्त-वादने (घ) पादोन-अष्ट-वादने

25.अपराह्ने (1:00)---------------भोजनं करोति।

(क) एक - वादने (ख) सपाद-एक-वादने (ग) सार्ध- एक-वादने (घ) पादोन-एक-वादने

26. सायं (4:15)------------- क्रीडनाय गच्छति।

(क) चतुर्वादने (ख) सपाद-चतुर्वादने (ग) सार्ध-चतुर्- वादने (घ) पादोन-चतुर्वादने


Jharworld.com

**निर्देशः - उचित-अव्ययपदं विकल्पेभ्यः चित्वा लिखन्तु -**

27. 'रामायणम्' - - - - -वाल्मीकिना लिखितम्।

(क) अद्य (ख) पुरा (ग) इति (घ) इति

28. शृगालः - - - - - - - -भ्रमति ।

(क) इतस्ततः (ख)इव (ग) तदा (घ) चेत्

29. मेघः- - - - - - - गर्जति।

(क) तदा (ख) उच्चैः (ग) चित् (घ)विना

30. अहं - - - - - - - - विद्यालयं गमिष्यामि।

(क) अत्र (ख) विना (ग) चित् (घ) श्वः

**(अपठित-गद्यांशः)** **(12 अङ्काः** )

(अस्मिन् खण्डे केवलं **षट्- प्रश्नानाम् उत्तराणि** एव देयानि)

**निर्देशः -अधोलिखितं गद्यांशं पठित्वा केवलं षट्- प्रश्नानाम् उत्तराणि एव देयानि - (2x6=12)**

"मम प्रियं पुस्तकं रामायणम् अस्ति । अस्मिन् ग्रन्थे मर्यादापुरुषोत्तमस्य श्रीरामस्य जीवनस्य वृत्तं वर्तते। अस्य लेखकः महर्षि वाल्मीकिः आसीत् । सः आदिकविः आसीत्, अतः तस्य रचना आदिकाव्यम्' इति कृत्वा विद्वांसः स्मरन्ति। एतत् काव्यम् अनुष्टुप् छन्दसि निबद्धम्। अत्र श्लोकानां संख्या चतुर्विंशतिसहस्रं वर्तते, तेन रामायणं 'चतुर्विंशतिसाहस्री- संहिता' इति नाम्ना अपि विद्वद्भिः स्मर्यते । इदं कविना नारदमुनेः प्रेरणया ब्रह्मणः वचनेन च रचितम्। रामायणे 'बालकाण्ड-अयोध्याकाण्ड - अरण्यकाण्ड- किष्किन्धाकाण्ड-सुन्दरकाण्ड- युद्धकाण्ड-उत्तरकाण्ड इति सप्त- काण्डानि वर्तन्ते। केचन् विद्वांसः बालकाण्डम् उत्तरकाण्डं च अवान्तरकालिकं प्रक्षेपं मन्यन्ते। तत्र श्रीरामस्य प्रमुखतः महापुरुषरूपेण वर्णनं वर्तते ।"

**एकपदेन उत्तरत-**

(31) रामायणे कस्य महापुरुषस्य जीवनस्य वृत्तं वर्तते?

(32) रामायणं केन अन्येन नाम्ना विद्वद्भिः स्मर्यते?

(33) रामायणे कति काण्डाः सन्ति?

(34) कविना रामायणं कस्य प्रेरणया रचितम् ?

(35) आदिकविः कः कथ्यते?



Jharworld.com

(36) ' लेखकः महर्षिः वाल्मीकिः आसीत्' अत्र क्रिया-पदम् किम् अस्ति?

(37) 'एतत् काव्यम्' अनयोः पदयोः विशेषण-पदं किम् अस्ति?

(38) 'केचन विद्वांसः बालकाण्डम् उत्तरकाण्डं च अवान्तरकालिकं प्रक्षेपं मन्यन्ते।'

अस्मिन् वाक्ये 'मन्यन्ते' इति क्रिया-पदस्य कर्तृ-पदं किम् अस्ति?

(अस्मिन् खण्डे केवलं **षट्- प्रश्नानाम् उत्तराणि** एव देयानि) **(18 अङ्काः)**

**निर्देशः - गद्यांशं पद्यांशं च पठित्वा केवलं षट्-प्रश्नानाम् उत्तराणि एव देयानि - (3x6=18)**

"बहून्यपत्यानि मे सन्तीति सत्यम् । तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः । सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत्-" गच्छ वत्से ! सर्वं भद्रं जायेत ।अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। लोकानां पश्यताम् एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षातिरेकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात् ।"

**पूर्णवाक्येन उत्तरत-**

(39) सर्वेष्वपत्येषु जननी कीदृशी भवति ?

(40) कुत्र जलोपप्लवः सञ्जातः ?

(41) कस्य वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत् ।

(42) कीदृशे सुते मातुः अभ्यधिका कृपा भवति?

**निर्देशः -** श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

**" उदीरितोऽर्थः पशुनापि गृह्यते, हयाश्च नागाश्च वहन्ति बोधिताः ।**

**अनुक्तमप्यूहति पण्डितो जनः, परेङ्गितज्ञानफला हि बुद्धयः ॥"**

(43) उदीरितोऽर्थः केनापि गृह्यते ?

(44) केऽपि बोधिताः वहन्ति ?

(45) कीदृशी हि बुद्धयः भवन्ति?

(46) 'अश्वाः' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?



Jharworld.com

**(20 अङ्काः)**

(अस्मिन् खण्डे केवलं **चतुर्णां प्रश्नानाम् उत्तराणि** एव देयानि) (4x5=20)

(47) **निर्देशः** - अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

"काकः- रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।

गजः - समीपतः एवागच्छन् अरे ! अरे! सर्वां वार्तां शृण्वन्नेवाहम् अत्रागच्छम् । अहं विशालकायः, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि । वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी । अतः अहमेव योग्यः वनराजपदाय ।

वानरः - अरे! अरे ! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति ।) "

**पूर्णवाक्येन उत्तरत -**

(क) काकः कस्य सन्ततिं पालयति ? करुणापरः कथं च?

(ख) गजः आत्मनः विषये किं कथयति ?

(48) **अधोलिखित - श्लोकस्य अन्वयं मंजूषायाः पदानि चित्वा लिखन्तु -**

"क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशनाय ।
यथास्थितः काष्ठगतो हि वह्निः , स एव वह्निर्दहते शरीरम् ॥"

**अन्वयः** - नराणां देहविनाशनाय (i) - - - - - - शत्रुः देहस्थितः (ii)-----------(भवति) यथा (iii)- - - - - - स्थितः (iv)---------काष्ठम् एव दहते (तथैव शरीरस्थः क्रोधः) (v)-------- दहते।

**मंजूषा** - (वह्निः, प्रथमः, काष्ठगतः, शरीरं, क्रोधः)

(49) **अधोलिखित-श्लोकस्य भावार्थं मंजूषायाः उचित - पदानि चित्वा लिखन्तु-**

**"विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।**
**अश्वश्चेद् धावने वीरः भारस्य वहने खरः ॥"**

भावार्थः अस्ति यत् अस्मिन् विचित्रे (i)---------------किञ्चिदपि वस्तु (ii) - - - - - - - -

नास्ति। यतः यदा धावनस्य कार्यं भवति तदा (iii)-----------प्रयोगः क्रियते, परन्तु यदा भारवहनस्य कार्यं क्रियते तदा (iv) - - - - - ----- (v) - - - - - ----- भवति ।

**मञ्जूषा** - (संसारे, अश्वस्य, निरर्थकम्, खरः, उपयोगी )

(50) **रेखांकित-पदेषु आधृत्य प्रश्न-निर्माणं कुरुत -**



Jharworld.com

(क) **<u>पतङ्गाः</u>** अम्बरपथम् आपेदिरे।

(ख) चातकः **<u>वने</u>** वसति।

(ग) **<u>भूकम्पकारणं</u>** विचारणीयं तिष्ठति।

(घ) न्यायधीशः **<u>बंकिमचन्द्रः</u>** आसीत् ।

(ङ) **<u>पुत्रं</u>** द्रष्टुं सः प्रस्थितः।

(51) **परीक्षा-शुल्क- क्षमापनार्थम् प्रधानाध्यापकं प्रति लिखितं पत्रं प्रदत्त-मंजूषा- सहायतया पूरयत-**


सेवायाम्,
प्रधानाध्यापक- महोदयाः ,
क-ख-ग विद्यालयः, राँचीनगरम् ।
विषयः- शुल्क-क्षमापनार्थम् आवेदन-पत्रम् ।
महाशय,

(i) ---------- निवेदनम् इदम् अस्ति यत् (ii) --------- भवतः विद्यालयस्य एकः निर्धनः (iii)--------- अस्मि। मम जनकः एकः निर्धनः (iv)-------- -अस्ति। जनकस्य वार्षिकः (v) - - - - - - अति न्यूनः अस्ति । अस्मिन् (vi)---------वृष्टिः न जाता। वृष्टेः अभावात् (vii)----------- अपि क्षेत्रे न जातम्। गृहे सप्त-सदस्याः सन्ति । अत एव गृहस्य (viii)----------- अति दयनीया अस्ति । एतदर्थम् मम वार्षिक परीक्षायाः (ix)------------ क्षम्यताम् । यतो हि शुल्कं दातुम् असमर्थः अस्मि । भवताम् (x)-----------छात्रः, शुभम

कक्षा- दशमी ।

**मंजूषा** - ( स्थितिः, सविनयं, छात्रः, अहम्, आयः, कृषकः, अन्नम्, वर्षे, आज्ञाकारी, शुल्कम्)

(52) **चित्रं दृष्ट्वा प्रदत्त-मंजूषा-सहायतया संस्कृते पञ्च-वाक्यानि लिखन्तु -**





Jharworld.com

**मञ्जूषा** - (नौका, तीरे, जलम्, जनाः, भ्रमन्ति, आधुनिकयुगस्य, समृद्धेः, विशालभवनानि, प्रसन्नाः, शान्तम्, सुन्दर, सागरे)

**अथवा**

'विद्यालयस्य प्रार्थना सभा ' इति विषयमाधृत्य प्रदत्त - मंजूषा - सहायता एकम् अनुच्छेदं लिखत-

**मञ्जूषा-** (छात्राः, विद्यालयस्य प्राङ्गणे, एकत्रिताः, उपस्थिताः, समाचारं, प्रश्नोत्तरीं, कवितावाचनं, सुविचारम्, कथयन्ति, अनुशासने, अन्ते, राष्ट्रियगानं, प्राचार्यस्य भाषणम्

नवोन्मेष शोध नेतृत्व
JCERT



Jharworld.com

# झारखंड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची

## उत्तराणि (MCQ) 2023-24

### ( मोडल-प्रश्न-पत्र)

कक्षा - दशमी | विषयः- संस्कृतम् | पूर्णांकः- 30

---

**(उत्तराणि)**

| | | |
|---|---|---|
| 1.(ख) तथापि | 2. (क) चलदनिशम् | 3. (घ) पवनम् |
| 4. (क) वर्षा +ऋतुः | 5. (ख) जन+तल् | 6.(क) बलवती |
| 7. (क) बली | 8. (ख) वदन्तः | 9. (ख) महात्मानः |
| 10. (ख) गङ्गायाः समीपं | 11. (क) धूर्त-शृगालः | 12.(ख) राम-लक्ष्मणौ |
| 13.(क) पश्यति | 14. (ख) पुस्तकम् | 15. (घ) हस्यते |
| 16. (क) अहम् | 17. (ख) क्रियते | 18. (ख) खादामि |
| 19. (क) जनः | 20. (ग) शोभना | 21.(ख) सीतया |
| 22.(ख) सपाद-पञ्च- वादने | 23. (ग) सार्ध-षड्-वादने | 24. (घ) पादोन-अष्ट-वादने |
| 25. (क) एक-वादने | 26. (ख) सपाद-चतुर्वादने | 27. (ग) इति |
| 28. (क) इतस्ततः | 29 (ख) उच्चैः | 30.(घ) श्वः |

नवोन्मेष शोध नेतृत्व JCERT



Jharworld.com